# २. पादुका सहस्रम् - समाख्या पद्धतिः (१०)

वन्दे विष्णुप दासक्तं तमृषिं तां च पादुकाम् ।
यथार्था शठजित्संज्ञा मच्चित्त विजयाद्ययोः ॥ २.१॥ २१॥

द्रमिडोपनिष न्निवेशशून्यान् अपि लक्ष्मीरमणाय रोचयिष्यन् ।
ध्रुवमाविशति स्म पादुकात्मा शठकोपः स्वयमेव माननीयः ॥ २.२॥ २२॥

नियतं मणिपादुके दधानः स मुनिस्ते शठकोप इत्यभिख्याम् ।
त्वदुपाश्रित पादजातवंश प्रतिपत्यै परमाततान रूपम् ॥ २.३॥ २३॥

मुनिना मणिपादुके त्वया च प्रथिताभ्यां शठकोप संज्ञयैव ।
द्वितयं सकलोप जीव्यमासीत् प्रथमेन श्रुति रन्यत स्तदर्थः ॥ २.४॥ २४॥

आकर्ण्य कर्णामृत मात्मवन्तो गाथा सहस्रं शठकोप सूरेः ।
मञ्जुप्रणादां मणिपादुके त्वां तदेक नामान मनुस्मरन्ति ॥ २.५॥ २५॥

यः सप्तपर्व व्यवधान तुङ्गां शेषत्वकाष्ठा मभजन्मुरारेः ।
तस्यापि नामोद्वहनात् त्वयाऽसौ लघूकृतोऽभूच्छठकोप सूरिः ॥ २.६॥ २६॥

शय्यात्मना मधुरिपो रसि शेषभूता
पादाश्रयेण च पुन र्द्विगुणी कृतं तत् ।

भूयोऽपि भागवत शेषतया तदेव
व्यङ्क्तुं पदावनि शठारिपदं बिभर्षि ॥ २.७॥ २७॥

पद्येन देवि शठकोप मुनिस्तवासीत्
तस्यापि नाम वहनान् मणिपादुके त्वम् ।
शेषी बभूव युवयोरपि शेषशायी
शेषं त्वशेषमपि शेषपदे स्थितं वः ॥ २.८॥ २८॥

विन्ध्य स्तम्भा दविहत गते र्विष्व गाचान्त सिन्धोः
कुम्भीसूनो रसुर कबल ग्रासिनः स्वैरभाषा ।
नित्यं जाता शठरिपुतनो र्निष्पतन्ती मुखात् ते
प्राचीनानां श्रुति परिषदां पादुके पूर्वगण्या ॥ २.९॥ २९॥

शठकोप इति समाख्या तव रङ्गधुरीण पादुके युक्ता ।
सूते सहस्रमेवं सूक्तीः स्वयमेव यन्मया भवती ॥ २.१०॥ ३०॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
समाख्या पद्धति र्द्वितीया ॥